M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Sat. 1066

Title: Sikshā Pradikshana Mantra

1066

Complete

C

Lakshia Pradikshana Mantrā			Title
			Author
			Editor
			Year, Vols.
SK			Publisher
1066			Remarks

श्री: अथ लक्षप्रदक्षिणं युधिष्ठिर: कृष्ण कृष्ण महाबाहो सर्वदोषविनाशन । येन व्रतेन चीर्णेन
सर्वपापक्षयो भवेत् १ सर्वेषामाश्रमाणां च वर्णानां च स्त्रियामपि श्रीभगवानुवाच पुराकृस्माष नृप
ति गुरुपुत्रवधान्नृप २ किल्बिषी क्रूरकर्मा यो ब्रह्मराक्षसरूपवान् बोधितो देवलेनाथ पापमोक्ष
णकारक ३ लक्षप्रदक्षिणं नाम व्रतं चक्रे सुदुर्लभं युधिष्ठिर: किं दानं को विधि: का वा देवता काल एव
वं ४ कृष्ण: चातुर्मास्ये तु संप्राप्ते पंचगव्य शुचिर्भवेत् स्वकृतं पापमुद्दिश्य [illegible] कृतं भवेत् ५
संकल्प्य नियमं कृत्वा कार्त्तिक्यां विजितेन्द्रियः सुशालये स्वस्थमूले तुलस्या गोव्रजे [illegible] थ वा ६ करसंपुट
मादाय प्राङ्मुखो दक्षिणे करे स्थित्वा प्रदक्षिणं कृत्वा नत्वा चैव तथा विधि: ७ यानि कानि च पापा-
अनेन विधिना राजन् प्रदक्षिण समापनं लक्षं समाप्य पश्चात्तु कुर्यादुद्यापनं व्रती ८ आचार्यं वर
येद्विद्वान् ब्राह्मणं ऋत्विजांस्तथा स्वस्तिवाचनपूर्वं तु मासाधिदेवमर्चयेत् ९ सौवर्णेण विधानेन संक
ल्पेन कलशोर्चयेत् उपचारै: षोडशभिर्वेदोक्तविधिना ततः १० कृत्वाथ विष्णुगायत्र्या शतमष्टोत्तरं
चरुं कपिलां गां तथा दद्यादाचार्याय सदक्षिणां ११ ब्राह्मणान् ऋत्विजश्चैव यथान्यायं प्रपूजयेत् भोज
नं ततो दद्याद्दक्षिणाभिश्च तोषयेत् १२ एवं कृत्वा विधानेन भुक्तिमुक्तिप्रदायकं पूर्वजन्मार्जितैः पा
पैरिह जन्मार्जितैरपि १३ आगामिजन्मनि चैव मुच्यते नात्र संशयः तस्मात्त्वमपि राजेन्द्र कुरुष्व

तमुत्तमं १४ विमुक्तःसर्वपापेभ्योत्वा पदःसंतरिष्यसि। यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चि
तं इदंव्रतंमहापुण्यंपवित्रंपापनाशनं १५ भुक्तिदंमुक्तिदंनित्यंजन्मजन्मार्जितैरपि। ।इति
विष्णुधर्मोत्तरे कृष्णयुधिष्ठिरसंवादे लक्षप्रदक्षिणाव्रतंसंपूर्णं श्रीकृष्णार्पणमस्तु श्री २